# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्

## सत्रान्तपरीक्षा – एप्रिल – २०१९

**कक्षा –** शास्त्रिप्रथमवर्षम् (SEM-2) **प्रश्नपत्रम् –** ७ **गुणाः -** ७०

**विषयः** - साहित्यम् (गौणम्) **कोड – CE 122.** **समयः -** ११ तः ०२

**( NEW / OLD )**

**दिनाङ्कः** - १८/०४/२०१९ **सन्दर्भग्रन्थः –** साहित्यदर्पणः

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः – १ अधोलिखितषुः कयोश्चिद् द्वयोः ससन्दर्भं व्याख्यां कुरुत |** १०

१. करुणादावपि रसे जायते यत्परं सुखम् ।
सचेतसामनुभवः प्रमाणं तत्र केवलम् ॥

२. नायं ज्ञाप्यः स्वसत्तायां प्रतीत्यव्यभिचारतः ।
यस्मादेष विभावादिसमूहालम्बनात्मकः ॥

३. प्रियः कृत्वापि संकेतं यस्या नायाति संनिधिम् ।
विप्रलब्धा तु सा ज्ञेया नितान्तमवमानिता ॥

प्रश्नः – २ नायकस्य भेदान् निरूपयत । १०

(अथवा)

रसस्य अलौकिकत्वं सत्यत्वं स्वप्रकाशत्वं च ग्रन्थोक्तदिशा प्रतिपादयत ।

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ३ कयोश्चिद् द्वयोः ससन्दर्भं व्याख्यां कुरुत |** १०

(१)चित्तसंमोह उन्मादः कामंशोकभयादिभिः ।
अस्थानहासरुदितगीतप्रलापनादिकृत् ॥

(२)तद्भाविते चित्ते वल्लभस्य कथादिषु ।
मोट्टायितमिति प्राहुः कर्णकण्डूयनादिकम् ॥

(३) उपायाभावजन्मा तु विषादः सत्त्वसंक्षयः ।
निःश्वासोच्छ्वासहृत्तापसहायान्वेषणादिकृत् ॥

प्रश्नः – ४ सामान्य नायिकायाः निरूपणं सप्रकारं कुरुत । १०

(अथवा)

नायिकायाः अलङ्कारान् वर्णयतु ॥

## तृतीयान्वितिः(Unit - 3)

**प्रश्नः – ५ अधोलिखितेषु द्वयोः ससन्दर्भं व्याख्यां कुरुत । १०**

१) श्रवणाद्दर्शनाद्वापि मिथ: संरुढरागयो: ।
दशाविशेषो योऽप्राप्तौ पूर्वराग: स उच्यते ॥

२) स्फुटं चमत्कारितया वत्सलं च रसं विदु: ।
स्थायी वत्सलता स्नेह: पुत्राद्यालम्बनं मतम् ॥

३) दर्शनस्पर्शनादीनि निषेवेते विलासिनौ ।
यत्रानुरक्तावन्योन्यं, संभोगोऽयमुदाहृत: ॥

प्रश्नः – ६ श्रृङ्गाररसस्वरूपं ग्रन्थानुसारं वर्णयत । १०

(अथवा)

व्यभिचारिणां किं स्वरूपम् ? कतिविधाश्च ते ? इति विशदं विवेचयत ।

## अन्वितय: १ – ३ (Unit 1 – 3)

**प्रश्नः – ७ अधोलिखितेषु प्रश्नेषु दशानां प्रश्नानां लघूत्तरं लिखत । १०**

१) विभावस्य किं लक्षणम् ?

२) अलौकिकस्य रसस्य सद्भावे किं प्रमाणम् ?

३) भरतोक्तं रससूत्रं किमास्ति ?

४) को नामलम्बनविभाव: ?

५) को नाम चमत्कार: ?

६) नायकस्य कति भेदा: भवन्ति ?

७) धीरललित – नायकस्य किं लक्षणम् ?

८) नायकस्य दूता: कतिविधा: भवन्ति ?

९) के त्रयो भेदा: भवन्ति स्वीयाया: ?

१०) कन्या – नायिकाया: किं लक्षणम् ?

११) कति संख्याका: व्यभिचारिणो भवन्ति ?

१२) श्रृङ्गारस्य स्थायी भाव: क: ?

१३) विप्रलम्भ: कतिविध: ?

१४) पूर्वराग: कति – विध: ?

१५) तृतीयपरिच्छेदस्य प्रधानोवर्ण्यो विषय: क: ?

*****************